# પ્રશ્નોપનિષત્

Prashna Upanishad

sanskritdocuments.org

July 11, 2018

# Prashna Upanishad

# પ્રશ્નોપનિષત્

## Sanskrit Document Information

Text title : prashnopaniShat

File name : prashna.itx

Category : upanishhat, svara, upanishad

Location : doc_upanishhat

Author : Vedic Rishis

Transliterated by : Sorin Suciu sorins at hotmail.com

Proofread by : John Manetta, David Lyttle, Sunder Hattangadi

Description-comments : 4/108; Atharva Veda, Mukhya upanishad

Latest update : July 20, 1999, July 10, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

July 11, 2018

*sanskritdocuments.org*

# પ્રશ્નોપનિષત્

ૐ ભદ્રં કર્ણેભિઃ શૃણુયામ દેવા
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ
 સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ
 સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## પ્રથમઃ પ્રશ્નઃ ।

ૐ સુકેશા ચ ભારદ્વાજઃ શૈબ્યશ્ચ સત્યકામઃ સૌર્યાયણી ચ ગાર્ગ્યઃ
કૌસલ્યશ્ચાશ્વલાયનો ભાર્ગવો વૈદર્ભિઃ કબન્ધી કાત્યાયનસ્તે હૈતે
બ્રહ્મપરા બ્રહ્મનિષ્ઠાઃ પરં બ્રહ્માન્વેષમાણા એષ હ વૈ તત્સર્વં
વક્ષ્યતીતિ તે હ સમિત્પાણયો ભગવન્તં પિપ્પલાદમુપસન્નાઃ ॥ ૧.૧॥

તાન્હ સ ઋષિરુવાચ ભૂય એવ તપસા બ્રહ્મચર્યેણ શ્રદ્ધયા
સંવત્સરં સંવત્સ્યથ યથાકામં પ્રશ્નાન્ પૃચ્છત યદિ
વિજ્ઞાસ્યામઃ સર્વં હ વો વક્ષ્યામ ઇતિ ॥ ૧.૨॥

અથ કબન્ધી કાત્યાયન ઉપેત્ય પપ્રચ્છ ।
ભગવન્ કુતે હ વા ઇમાઃ પ્રજાઃ પ્રજાયન્ત ઇતિ ॥ ૧.૩॥

તસ્મૈ સ હોવાચ પ્રજાકામો વૈ પ્રજાપતિઃ સ તપોઽતપ્યત
સ તપસ્તપ્ત્વા સ મિથુનમુત્પાદયતે । રયિં ચ પ્રાણં
ચેત્યેતૌ મે બહુધા પ્રજાઃ કરિષ્યત ઇતિ ॥ ૧.૪॥

આદિત્યો હ વૈ પ્રાણો રયિરેવ ચન્દ્રમા રયિર્વા એતત્

સર્વં યન્મૂર્તં ચામૂર્તં ચ તસ્માન્મૂર્તિરેવ રયિઃ ॥ ૧.૫॥

અથાદિત્ય ઉદયન્યત્પ્રાચીં દિશં પ્રવિશતિ તેન પ્રાચ્યાન્ પ્રાણાન્
રશ્મિષુ સન્નિધત્તે । યદ્દક્ષિણાં યત્ પ્રતીચીં યદુદીચીં યદધો
યદૂર્ધ્વં યદન્તરા દિશો યત્ સર્વં પ્રકાશયતિ તેન સર્વાન્ પ્રાણાન્
રશ્મિષુ સન્નિધત્તે ॥ ૧.૬॥

સ એષ વૈશ્વાનરો વિશ્વરૂપઃ પ્રાણોઽગ્નિરુદયતે ।
તદેતદૃચાઽભ્યુક્તમ્ ॥ ૧.૭॥

વિશ્વરૂપં હરિણં જાતવેદસં
પરાયણં જ્યોતિરેકં તપન્તમ્ ।
સહસ્રરશ્મિઃ શતધા વર્તમાનઃ
પ્રાણઃ પ્રજાનામુદયત્યેષ સૂર્યઃ ॥ ૧.૮॥

સંવત્સરો વૈ પ્રજાપતિસ્તસ્યાયને દક્ષિણં ચોત્તરં ચ ।
તદ્યે હ વૈ તદિષ્ટાપૂર્તે કૃતમિત્યુપાસતે તે ચાન્દ્રમસમેવ
લોકમભિજયન્તે । ત એવ પુનરાવર્તન્તે તસ્માદેત ઋષયઃ
પ્રજાકામા દક્ષિણં પ્રતિપદ્યન્તે । એષ હ વૈ રયિર્યઃ
પિતૃયાણઃ ॥ ૧.૯॥

અથોત્તરેણ તપસા બ્રહ્મચર્યેણ શ્રદ્ધયા
વિદ્યયાઽઽત્માનમન્વિષ્યાદિત્યમભિજયન્તે । એતદ્વૈ
પ્રાણાનામાયતનમેતદમૃતમભયમેતત્ પરાયણમેતસ્માન્ન પુનરાવર્તન્ત
ઇત્યેષ નિરોધસ્તદેષ શ્લોકઃ ॥ ૧.૧૦॥

પઞ્ચપાદં પિતરં દ્વાદશાકૃતિં
દિવ આહુઃ પરે અર્ધે પુરીષિણમ્ ।
અથેમે અન્ય ઉ પરે વિચક્ષણં
સપ્તચક્રે ષડર આહુરર્પિતમિતિ ॥ ૧.૧૧॥

માસો વૈ પ્રજાપતિસ્તસ્ય કૃષ્ણપક્ષ એવ રયિઃ શુક્લઃ પ્રણસ્તસ્માદેત
ઋષયઃ શુક્લ ઇષ્ટં કુર્વન્તીતર ઇતરસ્મિન્ ॥ ૧.૧૨॥

અહોરાત્રો વૈ પ્રજાપતિસ્તસ્યાહરેવ પ્રાણો રાત્રિરેવ રયિઃ પ્રાણં વા એતે
પ્રસ્કન્દન્તિ યે દિવા રત્યા સંયુજ્યન્તે બ્રહ્મચર્યમેવ તદ્યદ્રાત્રૌ
રત્યા સંયુજ્યન્તે ॥ ૧.૧૩॥

અન્નં વૈ પ્રજાપતિસ્તતો હ વૈ તદ્રેતસ્તસ્માદિમાઃ પ્રજાઃ
પ્રજાયન્ત ઇતિ ॥ ૧.૧૪॥

તદ્યે હ વૈ તત્ પ્રજાપતિવ્રતં ચરન્તિ તે મિથુનમુત્પાદયન્તે ।
તેષામેવૈષ બ્રહ્મલોકો યેષાં તપો બ્રહ્મચર્યં યેષુ સત્યં
પ્રતિષ્ઠિતમ્ ॥ ૧.૧૫॥

તેષામસૌ વિરજો બ્રહ્મલોકો ન યેષુ જિહ્મમનૃતં ન
માયા ચેતિ ॥ ૧.૧૬॥

ઇતિ પ્રશ્નોપનિષદિ પ્રથમઃ પ્રશ્નઃ ॥

## દ્વિતીયઃ પ્રશ્નઃ ।

અથ હૈનં ભાર્ગવો વૈદર્ભિઃ પપ્રચ્છ । ભગવન્ કત્યેવ
દેવાઃ પ્રજાં વિધારયન્તે કતર એતત્ પ્રકાશયન્તે કઃ
પુનરેષાં વરિષ્ઠ ઇતિ ॥ ૨.૧॥

તસ્મૈ સ હોવાચાકાશો હ વા એષ દેવો વાયુરગ્નિરાપઃ
પૃથિવી વાઙ્મનશ્ચક્ષુઃ શ્રોત્રં ચ । તે પ્રકાશ્યાભિવદન્તિ
વયમેતદ્બાણમવષ્ટભ્ય વિધારયામઃ ॥ ૨.૨॥

તાન્ વરિષ્ઠઃ પ્રાણ ઉવાચ । મા મોહમાપદ્યથ અહમેવૈતત્
પઞ્ચધાઽઽત્માનં પ્રવિભજ્યૈતદ્બાણમવષ્ટભ્ય વિધારયામીતિ
તેઽશ્રદ્દધાના બભૂવુઃ ॥ ૨.૩॥

સોઽભિમાનાદૂર્ધ્વમુત્ક્રામત ઇવ તસ્મિન્નુત્ક્રામત્યથેતરે સર્વ
એવોત્ક્રામન્તે તસ્મિંશ્ચ પ્રતિષ્ઠમાને સર્વ એવ પ્રતિષ્ઠન્તે । તદ્યથા
મક્ષિકા મધુકરરાજાનમુત્ક્રામન્તં સર્વ એવોત્ક્રમન્તે તસ્મિંષ્ચ
પ્રતિષ્ઠમાને સર્વ એવ પ્રાતિષ્ટન્ત એવં વાઙ્મનષ્ચક્ષુઃ શ્રોત્રં
ચ તે પ્રીતાઃ પ્રાણં સ્તુન્વન્તિ ॥ ૨.૪॥

એષોઽગ્નિસ્તપત્યેષ સૂર્ય
એષ પર્જન્યો મઘવાનેષ વાયુઃ
એષ પૃથિવી રયિર્દેવઃ
સદસચ્ચામૃતં ચ યત્ ॥ ૨.૫॥

અરા ઇવ રથનાભૌ પ્રાણે સર્વં પ્રતિષ્ઠિતમ્ ।
ઋચો યજૂँષિ સામાનિ યજ્ઞઃ ક્ષત્રં બ્રહ્મ ચ ॥ ૨.૬॥

પ્રજાપતિશ્ચરસિ ગર્ભે ત્વમેવ પ્રતિજાયસે ।
તુભ્યં પ્રાણ પ્રજાસ્ત્વિમા બલિં હરન્તિ
યઃ પ્રાણૈઃ પ્રતિતિષ્ઠસિ ॥ ૨.૭॥

દેવાનામસિ વહ્નિતમઃ પિતૄણાં પ્રથમા સ્વધા ।
ઋષીણાં ચરિતં સત્યમથર્વાઙ્ગિરસામસિ ॥ ૨.૮॥

ઇન્દ્રસ્ત્વં પ્રાણ તેજસા રુદ્રોઽસિ પરિરક્ષિતા ।
ત્વમન્તરિક્ષે ચરસિ સૂર્યસ્ત્વં જ્યોતિષાં પતિઃ ॥ ૨.૯॥

યદા ત્વમભિવર્ષસ્યથેમાઃ પ્રાણ તે પ્રજાઃ ।
આનન્દરૂપાસ્તિષ્ઠન્તિ કામાયાન્નં ભવિષ્યતીતિ ॥ ૨.૧૦॥

વ્રાત્યસ્ત્વં પ્રાણૈકર્ષરત્તા વિશ્વસ્ય સત્પતિઃ ।
વયમાદ્યસ્ય દાતારઃ પિતા ત્વં માતરિશ્વ નઃ ॥ ૨.૧૧॥

યા તે તનૂર્વાચિ પ્રતિષ્ઠિતા યા શ્રોત્રે યા ચ ચક્ષુષિ ।
યા ચ મનસિ સન્તતા શિવાં તાં કુરુ મોત્ક્રમીઃ ॥ ૨.૧૨॥

પ્રાણસ્યેદં વશે સર્વં ત્રિદિવે યત્ પ્રતિષ્ઠિતમ્ ।
માતેવ પુત્રાન્ રક્ષસ્વ  શ્રીશ્ચ પ્રજ્ઞાં ચ વિધેહિ ન ઇતિ ॥ ૨.૧૩॥

ઇતિ પ્રશ્નોપનિષદિ દ્વિતીયઃ પ્રશ્નઃ ॥

## તૃતીયઃ પ્રશ્નઃ

અથ હૈનં કૌશલ્યશ્ચાશ્વલાયનઃ પપ્રચ્છ । ભગવન્ કુત
એષ પ્રાણો જાયતે કથમાયાત્યસ્મિઞ્શરીર આત્માનં  વા
પ્રવિભજ્ય કથં પ્રતિષ્ઠતે કેનોત્ક્રમતે કથં બાહ્યમભિધત્તે
કથમધ્યાત્મમિતિ ॥ ૩.૧॥

તસ્મૈ સ હોવાચાતિપ્રશ્નાન્ પૃચ્છસિ બ્રહ્મિષ્ઠોઽસીતિ
તસ્માત્તેઽહં બ્રવીમિ ॥ ૩.૨॥

આત્મન એષ પ્રાણો જાયતે । યથૈષા પુરુષે
છાયૈતસ્મિન્નેતદાતતં

મનોકૃતેનાયાત્યસ્મિઞ્શરીરે ॥ ૩.૩॥

યથા સમ્રાદેવાધિકૃતાન્ વિનિયુઙ્ક્તે । એતન્ ગ્રામાનોતાન્
ગ્રામાનધિતિષ્ઠસ્વેત્યેવમેવૈષ પ્રાણ ઇતરાન્ પ્રાણાન્ પૃથક્
પૃથગેવ સન્નિધત્તે ॥ ૩.૪॥

પાયૂપસ્થેઽપાનં ચક્ષુઃશ્રોત્રે મુખનાસિકાભ્યાં પ્રાણઃ સ્વયં
પ્રાતિષ્ઠતે મધ્યે તુ સમાનઃ । એષ હ્યેતદ્ધુતમન્નં સમં નયતિ
તસ્માદેતાઃ સપ્તાર્ચિષો ભવન્તિ ॥ ૩.૫॥

હૃદિ હ્યેષ આત્મા । અત્રૈતદેકશતં નાડીનાં તાસાં શતં
શતમેકૈકસ્યા દ્વાસપ્તતિર્દ્વાસપ્તતિઃ પ્રતિશાખાનાડીસહસ્રાણિ
ભવન્ત્યાસુ વ્યાનશ્ચરતિ ॥ ૩.૬॥

અથૈકયોર્ધ્વ ઉદાનઃ પુણ્યેન પુણ્યં લોકં નયતિ પાપેન
પાપમુભાભ્યામેવ મનુષ્યલોકમ્ ॥ ૩.૭॥

આદિત્યો હ વૈ બાહ્યઃ પ્રાણ ઉદયત્યેષ હ્યેનં ચાક્ષુષં
પ્રાણમનુગૃહ્ણાનઃ । પૃથિવ્યાં યા દેવતા સૈષા પુરુષસ્ય
અપાનમવષ્ટભ્યાન્તરા યદાકાશઃ સ સમાનો વાયુર્વ્યાનઃ ॥ ૩.૮॥

તેજો હ વા ઉદાનસ્તસ્માદુપશાન્તતેજાઃ । પુનર્ભવમિન્દ્રિયૈર્મનસિ
સમ્પદ્યમાનૈઃ ॥ ૩.૯॥

યચ્ચિત્તસ્તેનૈષ પ્રાણમાયાતિ । પ્રાણસ્તેજસા યુક્તઃ સહાત્મના
તથાસઙ્કલ્પિતં લોકં નયતિ ॥ ૩.૧૦॥

ય એવં વિદ્વાન્ પ્રાણં વેદ ન હાસ્ય પ્રજા હીયતેઽમૃતો
ભવતિ તદેષઃ શ્લોકઃ ॥ ૩.૧૧॥

ઉત્પત્તિમાયતિં સ્થાનં વિભુત્વં ચૈવ પઞ્ચધા ।
અધ્યાત્મં ચૈવ પ્રાણસ્ય વિજ્ઞાયામૃતમશ્નુતે
વિજ્ઞાયામૃતમશ્નુત ઇતિ ॥ ૩.૧૨॥

ઇતિ પ્રશ્નોપનિષદિ તૃતીયઃ પ્રશ્નઃ ॥

## ચતુર્થઃ પ્રશ્નઃ ।

અથ હૈનં સૌર્યાયણિ ગાર્ગ્યઃ પપ્રચ્છ । ભગવન્નેતસ્મિન્ પુરુષે કાનિ સ્વપન્તિ કાન્યસ્મિઞ્જાગ્રતિ કતર એષ દેવઃ સ્વપ્નાન્ પશ્યતિ કસ્યૈતત્ સુખં ભવતિ કસ્મિન્નુ સર્વે સમ્પ્રતિષ્ઠિતા ભવન્તીતિ ॥ ૪.૧॥

તસ્મૈ સ હોવાચ યથા ગાર્ગ્ય મરીચયોઽર્કસ્યાસ્તં ગચ્છતઃ સર્વા એતસ્મિંસ્તેજોમણ્ડલ એકીભવન્તિ તાઃ પુનઃ પુનરુદયતઃ પ્રચરન્ત્યેવં હ વૈ તત્ સર્વં પરે દેવે મનસ્યેકીભવતિ તેન તર્હ્યેષ પુરુષો ન શૃણોતિ ન પશ્યતિ ન જિઘ્રતિ ન રસયતે ન સ્પૃશતે નાભિવદતે નાદત્તે નાનન્દયતે ન વિસૃજતે નેયાયતે સ્વપિતીત્યાચક્ષતે ॥ ૪.૨॥

પ્રાણાગ્નય એવૈતસ્મિન્ પુરે જાગ્રતિ । ગાર્હપત્યો હ વા એષોઽપાનો વ્યાનોઽન્વાહાર્યપચનો યદ્ગાર્હપત્યાત્ પ્રણીયતે પ્રણયનાદાહવનીયઃ પ્રાણઃ ॥ ૪.૩॥

યદુચ્છ્વાસનિઃશ્વાસાવેતાવાહુતી સમં નયતીતિ સ સમાનઃ । મનો હ વાવ યજમાનઃ । ઇષ્ટફલમેવોદાનઃ । સ એનં યજમાનમહરહર્બ્રહ્મ ગમયતિ ॥ ૪.૪॥

અત્રૈષ દેવઃ સ્વપ્ને મહિમાનમનુભવતિ । યદ્દૃષ્ટં દૃષ્ટમનુપશ્યતિ શ્રુતં શ્રુતમેવાર્થમનુશૃણોતિ દેશદિગન્તરૈશ્ચ પ્રત્યનુભૂતં પુનઃ પુનઃ પ્રત્યનુભવતિ દૃષ્ટં ચાદૃષ્ટં ચ શ્રુતં ચાશ્રુતં ચાનુભૂતં ચાનનુભૂતં ચ સચ્ચાસચ્ચ સર્વં પશ્યતિ સર્વઃ પશ્યતિ ॥ ૪.૫॥

સ યદા તેજસાઽભિભૂતો ભવતિ । અત્રૈષ દેવઃ સ્વપ્નાન્ન પશ્યત્યથ યદૈતસ્મિઞ્શરીર એતત્સુખં ભવતિ ॥ ૪.૬॥

સ યથા સોભ્ય વયાંસિ વસોવૃક્ષં સમ્પ્રતિષ્ઠન્તે । એવં હ વૈ તત્ સર્વં પર આત્મનિ સમ્પ્રતિષ્ઠતે ॥ ૪.૭॥

પૃથિવી ચ પૃથિવીમાત્રા ચાપશ્ચાપોમાત્રા ચ તેજશ્ચ તેજોમાત્રા ચ વાયુશ્ચ વાયુમાત્રા ચાકાશશ્ચાકાશમાત્રા ચ ચક્ષુશ્ચ દ્રષ્ટવ્યં ચ શ્રોત્રં ચ શ્રોતવ્યં ચ ઘ્રાણં ચ ઘ્રાતવ્યં ચ રસશ્ચ રસયિતવ્યં ચ ત્વક્ચ સ્પર્શયિતવ્યં ચ વાક્ચ વક્તવ્યં ચ હસ્તૌ ચાદાતવ્યં ચોપસ્થશ્ચાનન્દયિતવ્યં ચ પાયુશ્ચ વિસર્જયિતવ્યં ચ

યાદૌ ચ ગન્તવ્યં ચ મનશ્ચ મન્તવ્યં ચ બુદ્ધિશ્ચ બોદ્ધવ્યં
ચાહઙ્કારશ્ચાહઙ્કર્તવ્યં ચ ચિત્તં ચ ચેતયિતવ્યં ચ તેજશ્ચ
વિદ્યોતયિતવ્યં ચ પ્રાણશ્ચ વિધારયિતવ્યં ચ ॥ ૪.૮॥

એષ હિ દ્રષ્ટા સ્પ્રષ્ટા શ્રોતા ઘ્રાતા રસયિતા મન્તા બોદ્ધા કર્તા
વિજ્ઞાનાત્મા પુરુષઃ । સ પરેઽક્ષર આત્મનિ સમ્પ્રતિષ્ઠતે ॥ ૪.૯॥

પરમેવાક્ષરં પ્રતિપદ્યતે સ યો હ વૈ તદચ્છાયમશરીરમલોહિતં
શુભ્રમક્ષરં વેદયતે યસ્તુ સોમ્ય । સ સર્વજ્ઞઃ સર્વો ભવતિ ।
તદેષ શ્લોકઃ ॥ ૪.૧૦॥

વિજ્ઞાનાત્મા સહ દેવૈશ્ચ સર્વૈઃ પ્રાણા ભૂતાનિ સમ્પ્રતિષ્ઠન્તિ યત્ર
તદક્ષરં વેદયતે યસ્તુ સોમ્ય સ સર્વજ્ઞઃ સર્વમેવાવિવેશેતિ ॥ ૪.૧૧॥

ઇતિ પ્રશ્નોપનિષદિ ચતુર્થઃ પ્રશ્નઃ ॥

## પઞ્ચમઃ પ્રશ્નઃ ।

અથ હૈનં શૈબ્યઃ સત્યકામઃ પપ્રચ્છ । સ યો હ વૈ
તદ્ભગવન્મનુષ્યેષુ પ્રાયણાન્તમોઙ્કારમભિધ્યાયીત । કતમં વાવ
સ તેન લોકં જયતીતિ । તસ્મૈ સ હોવાચ ॥ ૫.૧॥

એતદ્વૈ સત્યકામ પરં ચાપરં ચ બ્રહ્મ યદોઙ્કારઃ ।
તસ્માદ્વિદ્વાનેતેનૈવાયતનેનૈકતરમન્વેતિ ॥ ૫.૨॥

સ યદ્યેકમાત્રમભિધ્યાયીત સ તેનૈવ સંવેદિતસ્તૂર્ણમેવ
જગત્યામભિસમ્પદ્યતે । તમૃચો મનુષ્યલોકમુપનયન્તે સ તત્ર
તપસા બ્રહ્મચર્યેણ શ્રદ્ધયા સમ્પન્નો મહિમાનમનુભવતિ ॥ ૫.૩॥

અથ યદિ દ્વિમાત્રેણ મનસિ સમ્પદ્યતે સોઽન્તરિક્ષં
યજુર્ભિરુન્નીયતે સોમલોકમ્ । સ સોમલોકે વિભુતિમનુભૂય
પુનરાવર્તતે ॥ ૫.૪॥

યઃ પુનરેતં ત્રિમાત્રેણોમિત્યેતેનૈવાક્ષરેણ પરં પુરુષમભિ-
ધ્યાયીત સ તેજસિ સૂર્યે સમ્પન્નઃ । યથા પાદોદરસ્ત્વચા વિનિર્મુચ્યત
એવં હ વૈ સ પાપ્મના વિનિર્મુક્તઃ સ સામભિરુન્નીયતે બ્રહ્મલોકં
સ એતસ્માજ્જીવઘનાત્ પરાત્પરં પુરિશયં પુરુષમીક્ષતે । તદેતૌ

શ્લોકૌ ભવતઃ ॥ ૫.૫॥

તિસ્રો માત્રા મૃત્યુમત્યઃ પ્રયુક્તા
અન્યોન્યસક્તાઃ અનવિપ્રયુક્તાઃ ।
ક્રિયાસુ બાહ્યાભ્યન્તરમધ્યમાસુ
સમ્યક્ પ્રયુક્તાસુ ન કમ્પતે જ્ઞઃ ॥ ૫.૬॥

ઋગ્ભિરેતં યજુર્ભિરન્તરિક્ષં
સામભિર્યત્ તત્ કવયો વેદયન્તે ।
તમોઙ્કારેણૈવાયતનેનાન્વેતિ વિદ્વાન્
યત્તચ્છાન્તમજરમમૃતમભયં પરં ચેતિ ॥ ૫.૭॥

ઇતિ પ્રશ્નોપનિષદિ પઞ્ચમઃ પ્રશ્નઃ ॥

## ષષ્ઠઃ પ્રશ્નઃ ।

અથ હૈનં સુકેશા ભારદ્વાજઃ પપ્રચ્છ । ભગવન્ હિરણ્યનાભઃ કૌસલ્યો રાજપુત્રો મામુપેત્યૈતં પ્રશ્નમપૃચ્છત । ષોડશકલં ભારદ્વાજ પુરુષં વેત્થ । તમહં કુમારમબ્રુવં નાહમિમં વેદ । યદ્યહમિમમવેદિષં કથં તે નાવક્ષ્યમિતિ । સમૂલો વા એષ પરિશુષ્યતિ યોઽનૃતમભિવદતિ તસ્માન્નાર્હમ્યનૃતં વક્તુમ્ । સ તૂષ્ણીં રથમારુહ્ય પ્રવવ્રાજ । તં ત્વા પૃચ્છામિ ક્વાસૌ પુરુષ ઇતિ ॥ ૬.૧॥

તસ્મૈ સ હોવાચેહૈવાન્તઃશરીરે સોમ્ય સ પુરુષો યસ્મિન્નતાઃ ષોડશકલાઃ પ્રભવન્તીતિ ॥ ૬.૨॥

સ ઈક્ષાચક્રે । કસ્મિન્નહમુત્ક્રાન્ત ઉત્ક્રાન્તો ભવિષ્યામિ કસ્મિન્વા પ્રતિષ્ઠિતે પ્રતિષ્ઠાસ્યામીતિ ॥ ૬.૩॥

સ પ્રાણમસૃજત પ્રાણાચ્છ્રદ્ધાં ખં વાયુર્જ્યોતિરાપઃ પૃથિવીન્દ્રિયં મનઃ । અન્નમન્નાદ્વીર્યં તપો મન્ત્રાઃ કર્મ લોકા લોકેષુ ચ નામ ચ ॥ ૬.૪॥

સ યથેમા નદ્યઃ સ્યન્દમાનાઃ સમુદ્રાયણાઃ સમુદ્રં પ્રાપ્યાસ્તં ગચ્છન્તિ ભિદ્યેતે તાસાં નામરૂપે સમુદ્ર ઇત્યેવં પ્રોચ્યતે । એવમેવાસ્ય પરિદ્રષ્ટુરિમાઃ ષોડશકલાઃ પુરુષાયણાઃ પુરુષં પ્રાપ્યાસ્તં ગચ્છન્તિ

ભિદ્યેતે ચાસાં નામરૂપે પુરુષ ઇત્યેવં પ્રોચ્યતે સ એષોઽકલોઽમૃતો
ભવતિ તદેષ શ્લોકઃ ॥ ૬.૫॥

અરા ઇવ રથનાભૌ કલા યસ્મિન્પ્રતિષ્ઠિતાઃ ।
તં વેદ્યં પુરુષં વેદ યથ મા વો મૃત્યુઃ પરિવ્યથા ઇતિ ॥ ૬.૬॥

તાન્ હોવાચૈતાવદેવાહમેતત્ પરં બ્રહ્મ વેદ । નાતઃ
પરમસ્તીતિ ॥ ૬.૭॥

તે તમર્ચયન્તસ્ત્વં હિ નઃ પિતા યોઽસ્માકમવિદ્યાયાઃ પરં પારં
તારયસીતિ । નમઃ પરમઋષિભ્યો નમઃ પરમઋષિભ્યઃ ॥ ૬.૮॥

ઇતિ પ્રશ્નોપનિષદિ ષષ્ઠઃ પ્રશ્નઃ ॥

ૐ ભદ્રં કર્ણેભિઃ શૃણુયામ દેવા
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ
સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ
સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Encoded by Sorin Suciu sorins at hotmail.com
Proofread by Sorin SuciuJohn Manetta, David Lyttle, Sunder Hattangadi

*Prashna Upanishad*
pdf was typeset on July 11, 2018

Please send corrections to *sanskrit@cheerful.com*